# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा –एप्रिल - 2019

**कक्षा – शास्त्री (SEM-4)** | **प्रश्नपत्रम् – 8** | गुणाः –70

विषयः – पुराणेतिहासः | **कोड –C.E.2.4.8(Old)** | समयः – 3:00 तः 6:00

दिनाङ्कः – 08/04/2019 | सन्दर्भग्रन्थः – महाभारत-शान्तिपर्व-मोक्षधर्मपर्व 174-205 अध्यायाः

---

### प्रथमान्वितिः (Unit-1)

**प्रश्नः-1 द्वयोः श्लोकयोः ससन्दर्भंप्रसङ्गं व्याख्या कार्या। 10**

(1) श्वः कार्यमद्य कुर्वीत पूर्वाह्णे चापराह्णिकम्।
न हि प्रतीक्षते मृत्युः कृतमस्य न वा कृतम्॥

(2) नास्ति विद्या समं चक्षुर्नास्ति सत्यसमं लयः।
नास्ति रागसमं दुःखं नास्ति त्यागसमं सुखम्॥

(3) या दुस्त्यजा दुर्मतिभिर्या न जीर्यति जीर्यतः।
योऽसौ प्राणान्तिको रोगस्तां तृष्णां त्यजतः सुखम्॥

**प्रश्नः-2 शोकाकुलचित्तस्य शान्त्यै सेनजित् ब्राह्मणयोः संवादं वर्णयत। 10**

**अथवा**

**यथाग्रन्थं मङ्किगीतां लिखत।**

### द्वितीयान्वितिः (Unit-2)

**प्रश्नः-3 द्वयोः श्लोकयोः ससन्दर्भंप्रसङ्गं व्याख्या कार्या। 10**

(1) सत्यं ब्रह्म तपः सत्यं सत्यं विसृजते प्रजाः।
सत्येन धार्यते लोकः स्वर्गं सत्येन गच्छति॥

(2) नित्यमेव सुखं स्वर्गे सुखं दुःखमिहोभयम्।
नरके दुःखमेवाहुः सुखं तत्परमं पदम्॥

(3) अतिथिर्यस्य भग्नाशो गृहात् प्रतिनिवर्तते।
स दत्वा दुष्कृतं तस्मै पुण्यमादाय गच्छति॥

**प्रश्नः-4 चुतर्वर्णानां कर्माणि विलिख्य सत्यस्य महत्त्वं यथाग्रन्थं लिखत। 10**

**अथवा**

**ब्रह्मचर्याश्रमस्य गृहस्थाश्रमस्य च धर्मान् लिखत।**

## तृतीयान्वितिः (Unit-3)

**प्रश्नः-5 द्वयोः श्लोकयोः ससन्दर्भप्रसङ्गं व्याख्या कार्या।** **10**

(1) द्विविधा ब्राह्मणा राजन् धर्मस्च द्विविधः स्मृतः।
प्रवृत्ताश्च निवृत्ताश्च निवृत्तोऽहं प्रतिग्रहात् ॥

(2) सत्यमेकाक्षरं ब्रह्म सत्यमेकाक्षरं तपः।
सत्यमेकाक्षरो यज्ञः सत्यमेकाक्षरं श्रुतम् ॥

(3) यथा यथा कर्मगुणं फलार्थी करोत्ययं कर्मफले निविष्टः।
तथा तथायं गुणसम्प्रयुक्तः शुभाशुभं कर्मफलं भुनक्ति।

**प्रश्नः-6 जपस्य महिमानं विवर्ण्य जापकस्य गतिमगतिं ग्रन्थोक्तदिशा लिखत।** **10**

**अथवा**

**परब्रह्मणः प्राप्तिं आत्मतत्त्वनिरूपणं च यथाग्रन्थं कुरुत।**

**प्रश्नः-7 दशानां लघूत्तराणि लिखत।** **10**

(1) महाभारतस्यापरं नाम किम्?
(2) धाम शब्दस्य द्वितीया एकवचनं किम्?
(3) आत्मन् शब्दस्य द्वितीया बहुवचनं किम्?
(4) ज्ञानेन्द्रियाणि कानि?
(5) अत्महत्यापापमितिविषये कयोः संवादः?
(6) ब्राह्मणस्य कति मुख्यानि कर्माणि?
(7) जपविषये कयोः संवादः भवति?
(8) शान्तिशब्दस्य चतुर्थी एकवचनं किम्?
(9) व्यासस्य पितुः नाम किम्?
(10) युधिष्ठिरः कं प्रश्नान् पृच्छति?
(11) महाभूतानि कानि सन्ति?
(12) इक्ष्वाकु शब्दस्य सप्तमी एकवचनं किम्?
(13) महाभारते कति पर्वाणि सन्ति?
(14) पर्व शब्दः कस्मिन् लिङ्गे?
(15) महाभारतस्य मङ्गलश्लोकः कः?